

## Sri Natesha Sahasranama Stotram

# ॥ श्री नटेश सहस्रनाम स्तोत्रम् ॥

The following is a rare Sahasranama of **Lord Natesha** (a form of **Lord Shiva** in cosmic dancing poses). The source document of this Sahasranama is not traceable. As the Purva Pitika (Prologue) of this Sahasranama mentions, this hymn was given to **Lord Narayana** after his penance to Lord Shiva who prayed Lord Shiva's grace towards the protection of all worlds and destroyal of **Asuras** and attainment of all **Atma Yogas**.

One who chants this Sahasranam gets the divine vision of Lord Natesha's cosmic dance and gets all his sins destroyed and protection in all respects. He also gets all kinds of wealth, **Siddhis** and **Mukti** (emancipation).

## ॥ पूर्व पीठिका ॥

यस्मात् सर्वं समुत्पन्नं चराचरं इदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्य मूर्तये ॥ १ ॥

ॐ कैलाश शिखरे रम्ये रत्न सिंहासने स्थितम् ।
शङ्करं करुणामूर्तिं प्रणस्य परया मुदा ॥ २ ॥

विनयावनता भूत्वा पप्रच्छ परमेश्वरी ।
भगवन् भव सर्वज्ञ भव ताप हराव्यय ॥ ३ ॥

त्वत्तः श्रुतं मया देव सर्वं नाम सहस्रकम् ।
नटेशस्य तु नामानि न श्रुतानि मया प्रभो ॥ ४ ॥

अस्मत् प्रार्थितो ऽ पि त्वं न तत् कथितवानसि ।
इदानीं कृपया शंभो वद वाञ्छाभिपूर्तये ॥ ५ ॥

श्री शिव उवाच -

साधु साधु महादेवी पृष्टं सर्व जगद्धितम् ।
पुरा नारायणः श्रीमान् लोक रक्षा परायणः ॥ ६ ॥

क्षीराब्धौ सुचिरं कालं साम्बमूर्ति धरं शिवम् ।
मां एकाग्रेण चित्तेन ध्यायन् न्यवसद् अच्युतः ॥ ७ ॥

तपसा तस्य सन्तुष्टः प्रसन्नोऽहं कृपा वशात् ।
ध्यानात् समुत्थितो विष्णुर् लक्ष्म्या मां पर्य पूजयत् ॥ ८ ॥

तुष्टाव विविधैस् स्तोत्रैर् वेद वेदान्त सम्मितैः ।
वरं वरय हे वत्स यद् इष्टं मनसि स्थितम् ॥ ९ ॥

तत्ते दास्यामि न चिरादित्युक्तः कमलेक्षणः ।
प्राह मां परया भक्त्या वरं दास्यसि चेत् प्रभो ॥ १० ॥

रक्षार्थं सर्व जगतां असुराणां क्षयाय च ।
सर्वात्म्य योग सिद्ध्यर्थं मन्त्रं एकं ममादिश ॥ ११ ॥

इति संप्रार्थितस् तेन माधवेनाहं अम्बिके ।
सचिन्त्यानुत्तमं स्तोत्रं सर्वेषां सर्व सिद्धिदम् ॥ १२ ॥

नटेश नाम साहस्रं उक्तवान् अस्मि विष्णवे ।
तेन जित्वा ऽ सुरान् सर्वान् ररक्ष सकलं जगत् ॥ १३ ॥

सार्वात्म्यं योग सिद्धिदं च प्राप्तवान् अम्बुजेक्षणः ।
तदेव प्रार्थयस् यक्व नाम साहस्रं अम्बिके ॥ १४ ॥

पठनान् मननाद् यस्य नृत्तं दर्शयति प्रभुः ।
सर्व पाप हरं पुण्यं सर्व रक्षाकरं नृणाम् ॥ १५ ॥

सर्वैश्वर्य प्रदं सर्व सिद्धिदं मुक्तिदं परम् ।
वक्ष्यामि श्रृणु हे देवी नाम साहस्रं उत्तमम् ॥ १६ ॥

## ॥ विनियोगः ॥

ॐ अस्य श्रीनटेश सहस्र नाम स्तोत्र महामन्त्रस्य । सदाशिव ऋषिः । महाविराट् छन्दः । श्रीमन् नटेशो देवता ।

बीजं शक्तिः कीलकं अङ्ग न्यास कर न्यासौ च चिन्तामणि मन्त्रवत् ॥

## ॥ ध्यानम् ॥

ध्यायेत् कोटि रवि प्रभं त्रिणयनं शीतांशु गङ्गाधरम् ।
दक्षाङ्घ्रि स्थित वाम कुञ्चित पदं शार्दूल चर्माम्बरम् ।
वह्निं डोल करा ऽ भयं डमरुकं वामे शिवां श्यामलाम् ।
कह्लारां जप सृक् शुकां कटि करां देवीं सभेशं भजे ॥

## ॥ पंच पूजा ॥

| | | |
|---|---|---|
| लं | पृथिव्यात्मने | गन्धं समर्पयामि । |
| हं | आकाशात्मने | पुष्पैः पूजयामि । |
| यं | वाय्वात्मने | धूपं आघ्रापयामि । |
| रं | अग्न्यात्मने | दीपं दर्शयामि । |
| वं | अमृतात्मने | अमृतं महानैवेद्यं निवेदयामि । |
| सं | सर्वात्मने | सर्वोपचार पूजां समर्पयामि ॥ |

## ॥ श्री नटेश सहस्र नाम स्तोत्रम् ॥

श्री शिवा उवाच -

श्रीशिवः श्रीशिवानाथः श्रीमान् श्रीपति पूजितः ।
शिवङ्करश् शिवतरश् शिष्ट हृष्टश् शिवागमः ॥ १ ॥

अखण्डानन्द चिद्रूपः परमानन्द ताण्डवः ।
अपस्मृति न्यस्त पादः कृत्तिवासाः कृपाकरः ॥ २ ॥

काली वाद प्रियः कालः कालातीतः कलाधरः ।
कालनेता कालहन्ता कालचक्र प्रवर्तकः ॥ ३ ॥

कालज्ञः कामदः कान्तः कामारिः काम पालकः ।
कल्याणमूर्तिः कल्याणी रमणः कमलेक्षणः ॥ ४ ॥

कालकण्ठः कालकालः काल कूट विषाशनः ।
कृतज्ञः कृतिसारज्ञः कृशानुः कृष्ण पिङ्गलः ॥ ५ ॥

करि चर्माम्बरधरः कपाली कलुषापहः ।
कपाल मालाभरणः कङ्कालः कलि नाशनः ॥ ६ ॥

कैलास वासी कामेशः कविः कपट वर्जितः ।
कमनीयः कलानाथ शेखरः कम्बु कन्धरः ॥ ७ ॥

कन्दर्प कोटि सदृशः कपर्दी कमलाननः ।
कराब्ज धृत कालाग्निः कदम्ब कुसुमारुणः ॥ ८ ॥

कमनीय निजानन्द मुद्राञ्चित कराम्बुजः ।
स्फुरड् डमरु निध्वान निर्जिताम्भोधि निस्वनः ॥ ९ ॥

उद्दण्ड ताण्डवश् चण्ड ऊर्ध्व ताण्डव पण्डितः ।
सव्य ताण्डव संपन्नो महाताण्डव वैभवः ॥ १० ॥

ब्रह्माण्ड काण्ड विस्फोट महाप्रलय ताण्डवः ।
महोग्र ताण्डवाभिज्ञः परिभ्रमण ताण्डवः ॥ ११ ।

नन्दि नाट्य प्रियो नन्दी नटेशो नटवेश भृत् ।
कालिका नाट्य रसिको निशा नटन निश्चलः ॥ १२ ॥

भृङ्गि नाट्य प्रमाणज्ञो भ्रमरायित नाट्य कृत् ।
वियदादि जगत् स्रष्टा विविधानन्द दायकः ॥ १३ ॥

विकार रहितो विष्णुर् विराडीशो विराण्मयः ।
विराड् हृदय पद्मस्थो विधिर् विश्वाधिको विभुः ॥ १४ ॥

वीरभद्रो विशालाक्षो विष्णु बाणो विशां पतिः ।
विद्यानिधिर् विरूपाक्षो विश्वयोनिर् वृषध्वजः ॥ १५ ॥

विरूपो विश्वदिग् व्यापी वीतशोको विरोचनः ।
व्योमकेशो व्योममूर्तिर् व्योमाकारो ऽ व्ययाकृतिः ॥ १६ ॥

व्याघ्रपाद प्रियो व्याघ्र चर्म धृग् व्याधि नाशनः ।
व्याकृतो व्यापृतो व्यापी व्याप्य साक्षी विशारदः ॥ १७ ॥

व्यामोह नाशनो व्यासो व्याख्या मुद्रा लसत् करः ।
वरदो वामनो वन्द्यो वरिष्ठो वज्र वर्म भृत् ॥ १८ ॥

वेदवेद्यो वेदरूपो वेद वेदान्त वित्तमः ।
वेदार्थविद् वेदयोनिः वेदाङ्गो वेद संस्तुतः ॥ १९ ॥

वैकुण्ठ वल्लभो ऽ वर्ष्यो वैश्वानर विलोचनः ।
समस्त भुवन व्यापी समृद्धस् सततोदितः ॥ २० ॥

सूक्ष्मात् सूक्ष्मतरः सूर्यः सूक्ष्म स्थूलत्व वर्जितः ।
जह्नु कन्याधरो जन्म जरा मृत्यु निवारकः ॥ २१ ॥

शूरसेनः शुभाकारः शुभ्रमूर्तिः शुचि स्मितः ।
अनर्घ रत्न खचित किरीटो निकटे स्थितः ॥ २२ ॥

सुधारूपः सुराध्यक्षः सुभ्रूः सुरघनः सुधीः ।
भद्रो भद्रप्रदो भद्र वाहनो भक्त वत्सलः ॥ २३ ।

भग नेत्र हरो भर्गो भवघ्नो भक्तिमान् निधिः ।
अरुणः शरणः शर्वः शरण्यः शर्मदः शिवः ॥ २४ ॥

पवित्रः परमोदारः परमापन् निवारकः ।
सनातनस् समः सत्यः सत्यवादी समृद्धिदः ॥ २५ ॥

धन्वी धनाधिपो धन्यो धर्म गोप्ता धराधिपः ।
तरुणस् तारकस् ताम्रस् तरिष्णुस् तत्त्व बोधकः ॥ २६ ॥

राजराजेश्वरो रम्यो रात्रिञ्चर विनाशनः ।
गह्वरेष्ठो गणाधीशो गणेशो गति वर्जितः ॥ २७ ॥

पतञ्जलि प्राण नाथः परापर विवर्जितः ।
परमात्मा परंज्योतिः परमेष्ठी परात्परः ॥ २८ ॥

नारसिंहो नगाध्यक्षो नादान्तो नाद वर्जितः ।
नमदा नन्ददो नम्यो नगराज निकेतनः ॥ २९ ॥

दैव्यो भिषक् प्रमाणज्ञो ब्रह्मण्यो ब्राह्मणात्मकः ।
कृताकृतः कृशः कृष्णः शान्तिदश् शरभाकृतिः ॥ ३० ॥

ब्रह्म विद्या प्रदो ब्रह्मा बृहद् गर्भो बृहस्पतिः ।
सद्योजातस् सदाराध्यः सामगस् साम संस्तुतः ॥ ३१ ॥

अघोरो ऽ द्भुत चारित्र आनन्द वपुर् अग्रणीः ।
सर्व विद्यानां ईशानः ईश्वराणां अधीश्वरः ॥ ३२ ॥

सर्वार्थः सर्वदा तुष्टः सर्व शास्त्रार्थ सम्मतः ।
सर्वज्ञः सर्वदः स्थाणुः सर्वशस् समर प्रियः ॥ ३३ ॥

जनार्दनो जगत् स्वामी जन्म कर्म निवारकः ।
मोचको मोह विच्छेत्ता मोदनीयो महाप्रभुः ॥ ३४ ॥

व्युप्तकेशश् च विशदः विष्वक्सेनो विशोधकः ।
सहस्राक्षः सहस्राङ्घ्रिः सहस्र वदनाम्बुजः ॥ ३५ ॥

सहस्राक्षार्चितस् सम्राट् सन्धाता सम्पदालयः ।
बभ्रुर् बहुविधाकारो बल प्रमथनो बली ॥ ३६ ॥

मनोभर्ता मनोगम्यो मननैक परायणः ।
उदासीन उपद्रष्टा मौन गम्यो मुनीश्वरः ॥ ३७ ॥

अमानी मदनो ऽ मन्युर् अमानो मानदो मनुः ।
यशस्वी यजमानात्मा यज्ञ भृग् यजन प्रियः ॥ ३८ ॥

मीढुष्टमो मृगधरो मृकण्डु तनय प्रियः ।
पुरुहूतो पुर द्वेषी पुर त्रय विहारवान् ॥ ३९ ॥

पुण्यः पुमान् पुरिशयः पूषा पूर्णः पुरातनः ।
शयनश् शन्तमः शान्तः शासकश् श्यामला प्रियः ॥ ४० ॥

भावज्ञो बन्ध विच्छेत्ता भावातीतो ऽ भयङ्करः ।
मनीषी मनुजाधीशो मिथ्या प्रत्यय नाशनः ॥ ४१ ॥

निरञ्जनो नित्य शुद्धो नित्य बुद्धो निराशयः ।
निर्विकल्पो निरालम्बो निर्विकारो निरामयः ॥ ४२ ॥

निरङ्कुशो निराधारो निरपायो निरत्ययः ।
गुहाशयो गुणातीतो गुरुमूर्तिर् गुहप्रियः ॥ ४३ ॥

प्रमाणं प्रणवः प्राज्ञः प्राणदः प्राण नायकः ।
सूत्रात्मा सुलभस् स्वच्छः सूदरस् सुन्दराननः ॥ ४४ ॥

कपाल माला ऽ लङ्कारः कालान्तक वपुर्धरः ।
दुराध्यक्षो दुराधर्ष्यो दुष्टदूरो दुरासदः ॥ ४५ ॥

दुर्विज्ञेयो दुराचार नाशनो दुर्मदान्तकः ।
सर्वेश्वरः सर्वसाक्षी सर्वात्मा साक्षि वर्जितः ॥ ४६ ॥

सर्व द्वन्द्व क्षयकरः सर्वापद् विनिवारकः ।
सर्व प्रियतमस् सर्व दारिद्य क्लेश नाशनः ॥ ४७ ॥

द्रष्टा दर्शयिता दान्तो दक्षिणामूर्ति रूप भृत् ।
दक्षाध्वरहरो दक्षो दहरस्थो दयानिधिः ॥ ४८ ॥

समदृष्टिस् सत्यकामः सनकादि मुनि स्तुतः ।
पतिः पञ्चत्व निर्मुक्तः पञ्च कृत्य परायणः ॥ ४९ ॥

पञ्च यज्ञ प्रियः पञ्च प्राणाधिपतिर् अव्ययः ।
पञ्च भूत प्रभुः पञ्च पूजा सन्तुष्ट मानसः ॥ ५० ॥

विघ्नेश्वरो विघ्न हन्ता शक्ति पाणिश् शरोद्भवः ।
गूढो गुह्यतमो गोप्यो गोरक्षी गण सेवितः ॥ ५१ ॥

सुव्रतस् सत्य सङ्कल्पः स्वसंवेद्यस् सुखावहः ।
योगगम्यो योगनिष्ठो योगानन्दो युधिष्ठिरः ॥ ५२ ॥

तत्वावबोधस् तत्वेशः तत्वभावो तपोनिधिः ।
अक्षरस् त्र्यक्षरस् त्र्यक्षः पक्षपात विवर्जितः ॥ ५३ ॥

माणिभद्रार्चितो मान्यो मायावी मान्त्रिको महान् ।
कुठार भृत् कुलाद्रीशः कुञ्चितैक पदाम्बुजः ॥ ५४ ॥

यक्षराड् यज्ञ फलदो यज्ञमूर्तिर् यशस्करः ।
सिद्धेशस् सिद्धि जनकः सिद्धान्तस् सिद्ध वैभवः ॥ ५५ ॥

रवि मण्डल मध्यस्थो रजो गुण विवर्जितः ।
वह्नि मण्डल मध्यस्थो वर्षीयान् वरुणेश्वरः ॥ ५६ ॥

सोम मण्डल मध्यस्थः सोमस् सौम्यस् सुहृद् वरः ।
दक्षिणाग्निर् गार्हपत्यो दमनो दमनान्तकः ॥ ५७ ॥

चतुर्वक्त्रश् चक्रधरः पञ्चवक्त्रः परंतपः ।
विश्वस्यायतनो वर्यो वन्दारु जन वत्सलः ॥ ५८ ॥

गायत्री वल्लभो गार्ग्यो गायकानुग्रहो ऽ न्मुखः ।
अनन्तरूप एकात्मा स्वस्तरुर् व्याहृदिस् स्वधा ॥ ५९ ॥

स्वाहारूपो वसुमनाः वटुकः क्षेत्रपालकः ।
श्राव्यश् शत्रुहरश् शूली श्रुति स्मृति विधायकः ॥ ६० ॥

अप्रमेयो ऽ प्रतिरथः प्रद्युम्नः प्रमथेश्वरः ।
अनुत्तमो ह्युदासीनो मुक्तिदो मुदिताननः ॥ ६१ ॥

ऊर्ध्वपाच् चोर्ध्वरेताश् च प्रौढ नर्तन लम्पटः ।
महामायो महाग्रासो महावीर्यो महाभुजः ॥ ६२ ॥

महानन्दो महास्कन्दो महेन्द्रो महसां निधिः ।
भ्राजिष्णुर् भावनागम्यः भ्रान्ति ज्ञान विनाशनः ॥ ६३ ॥

महर्धिर् महिमाधारो महासेन गुरुर् महः ।
सर्वदृग् सर्वभृत् सर्गः सर्वहृत् कोश संस्थितः ॥ ६४ ॥

दीर्घ पिङ्ग जटा जूटो दीर्घ बाहुर् दिगम्बरः ।
संयद्वामस् संयमीन्द्रः संशयच् छित् सहस्र दृक् ॥ ६५ ॥

हेतु दृष्टान्त निर्मुक्तो हेतुर् हेरम्ब जन्म भूः ।
हेला विनिर्मित जगद्धेम श्मश्रुर् हिरण्मयः ॥ ६६ ॥

सकृद् विभातस् संवेत्ता सदसत् कोटि वर्जितः ।
स्वात्मस्थस् स्वायुधः स्वामी स्वानन्यस् स्वांशिताखिलः ॥ ६७ ॥

रातिर् दातिश् चतुष्पादः स्वात्म बन्ध हरस् स्वभूः ।
वशी वरेण्यो विततो वज्रभृद् वरुणात्मजः ॥ ६८ ॥

चैतन्यश् च्छिदद्वैतः चिन्मात्रश् चित्शुभाधिपः ।
भूमा भूतपतिर् भव्यः भूर्भुवो व्याहृति प्रियः ॥ ६९ ॥

वाच्य वाचक निर्मुक्तो वागीशो वाग गोचरः ।
वेदान्त कृत् तुर्य पादो वैद्युतस् सुकृतोद्भवः ॥ ७० ॥

अशुभ क्षय कृज् ज्योतिः अनाकाशो ह्यलेपकः ।
आप्तकामो ऽ नुमन्तात्म कामो ऽ भिन्नोनणुर् हरः ॥ ७१ ॥

अस्नेहस् सङ्ग निर्मुक्तो ऽ ह्रस्वो ऽ दीर्घो ऽ विशेषकः ।
स्वच्छन्दस् स्वच्छ संवित् तिरन्वेष्टव्यो ऽ श्रुतो ऽ मृतः ॥ ७२ ॥

अपरोक्षो ऽ व्रणो ऽ लिङ्गो ऽ द्वेष्टा श्रीप्रेम सागरः ।
ज्ञानलिङ्गो गतिर् ज्ञानी ज्ञानगम्यो ऽ वभासकः ॥ ७३ ॥

शुद्ध स्फटिक सङ्काशः श्रुति प्रस्तुत वैभवः ।
हिरण्यबाहुस् सेनानीः हरिकेशो दिशां पतिः ॥ ७४ ॥

सस्पिञ्जरः पशुपतिः त्विषीमानध्वनां पतिः ।
बभ्लुषो भगवान् भव्यो विव्याधी विगत ज्वरः ॥ ७५ ॥

अन्नानां पतिर् अत्युग्रो हरिकेशो ऽ द्वयाकृतिः ।
पुष्टानां पतिर् अव्यग्रो भवहेतुर् जगत्पतिः ॥ ७६ ॥

आततायी महारुद्रः क्षेत्राणां अधिपाक्षयः ।
सूतस् सदसस्पतिस् सूरिर् अहन्त्यो वनपो वरः ॥ ७७ ॥

रोहितस् स्थपतिर् वृक्ष पतिर् मन्त्री च वाणिजः
कक्षपश् च भुवन्तिश् च भवाख्यो वारिवत् कृतः ॥ ७८ ॥

ओषधीशस् सतामीशः उच्चैर् घोषो विभीषणः ।
पत्तीनां अधिपः कृत्स्न वीतो धावत्स सत्वपः ॥ ७९ ॥

सहमानस् सत्य धर्मा विव्याधी नियमो यमः ।
अव्याधिपतिर् आदित्यः ककुभः काल कोविदः ॥ ८० ॥

निषङ्गीषुधिमद् इन्द्रः तस्कराणां अधीश्वरः ।
निचरुकः परिचरो ऽ रण्यानां पतिर् अद्भुतः ॥ ८१ ॥

सृकावी मुष्णतां नाथः पञ्चाशद् वर्ण रूप भृत् ।
नक्तंचरः प्रकृन्तानां पतिर् गिरिचरो गुरुः ॥ ८२ ॥

कुलुञ्चानां पतिः कूप्यो धन्वावी धनदाधिपः ।
आतन्वानश् शतानन्दः गृत्सो गृत्सपतिस् सुरः ॥ ८३ ॥

व्रातो व्रातपतिर् विप्रो वरीवान् क्षुल्लकः क्षमी ।
बिल्मी वरूपी दुन्दुभ्यो ऽऽ हनन्यः प्रमृषाभिधः ॥ ८४ ॥

धृष्णु ईतस् तीक्ष्ण दंष्ट्रः सुधन्वा सुलभस् शुखी ।
स्रुत्यः पथ्यः स्वतन्त्रस्थः काट्योनीप्यः करोटि भृत् ॥ ८५ ॥

सूद्यस् सरस्यो वैशन्तो नाद्यो ऽ वट्यश् च वार्षिकः ।
वैद्युत्यो विशदो मेध्यो रोष्मियो वास्तुपो वसुः ॥ ८६ ॥

अग्रेवधे ऽ ग्रे सम्पूज्यो हन्ता तारो मयो भवः ।
मयस्करो महातीर्थ्यः कूल्यः पार्यः पदात्मकः ॥ ८७ ॥

शङ्ग प्रतरणो ऽ वार्यः फेन्यः शष्प्यः प्रवाहजः ।
मुनिरातार्य आलाद्यः सिकत्यश् चाथ किंशिलः ॥ ८८ ॥

पुलस्त्यः क्षयणो गृध्यो गोष्ट्यो गो परिपालकः ।
शुष्क्यो हरित्यो लोप्यश् च सूर्म्यः पर्ण्यो ऽ णिमादि भूः ॥ ८९ ॥

पर्णशय्यः प्रत्यगात्मा प्रसन्नः परमोन्नतः ।
शीघ्रियश् शीभ्य आनन्दः क्षयद्वीरश् शरो ऽ क्षरः ॥ ९० ॥

पाशी पातक संहर्ता तीक्ष्णेषुस् तिमिरापहः ।
वराभय प्रदो ब्रह्म पुच्छो ब्रह्म विदां वरः ॥ ९१ ॥

ब्रह्मविद्या गुरु गुह्यो गुह्यकैस् समभिष्टुतः ।
कृतान्त कृत् क्रियाधारः कृती कृपण रक्षकः ॥ ९२ ॥

नैष्कर्म्यदो नवरसः त्रिस्थ त्रिपुर भैरवः ।
त्रिमात्रकस् त्रिविद् रूपः तृतीयस् त्रिगुणातिगः ॥ ९३ ॥

त्रिधामा त्रिजगद् हेतुः त्रिकर्ता तिर्यग् ऊर्ध्वगः ।
प्रपञ्चोपशमो नाम रूप द्वय विवर्जितः ॥ ९४ ॥

प्रकृतीशः प्रतिष्ठाता प्रभवः प्रमथः प्रथी ।
सुनिश्चितार्थो राद्धान्तः तत्त्वमर्थस् तपोमयः ॥ ९५ ॥

हितः प्रमाता प्राग्वर्ती सर्वोपनिषद् आशयः ।
विश्रृङ्खलो वियद् हेतुः विषमो विद्रुम प्रभः ॥ ९६ ॥

अखण्ड बोधो ऽ खण्डात्मा घण्टा मण्डल मण्डितः ।
अनन्त शक्तिर् आचार्यः पुष्कलस् सर्व पूरणः ॥ ९७ ॥

पुरुजित् पूर्वकः पुष्प हासः पुण्य फल प्रदः ।
ध्यान गम्यो ध्यातृ रूपः ध्येयो धर्मविदां वरः ॥ ९८ ॥

अवशः स्ववशः स्थाणुर् अन्तर्यामी शतक्रतुः ।
कूटस्थः कूर्म पीठस्थः कूष्माण्ड ग्रह मोचकः ॥ ९९ ॥

कूलङ्कषः कृपा सिन्धुः कुशली कुङ्कुमेश्वरः ।
गदाधरो गणस्वामी गरिष्ठस् तोमरायुधः ॥ १०० ॥

जवनो जगदाधारो जमदग्निर् जराहरः ।
जटाधरो ऽ मृताधारो ऽ मृतांशुर् अमृतोद्भवः ॥ १०१ ॥

विद्वत्तमो विदूरस्थो विश्रमो वेदनामयः ।
चतुर्भुजश् शत तनुः शमिता ऽ खिल कौतुकः ॥ १०२ ॥

वौषट्कारो वषट्कारो हुङ्कारः फट्करः पटुः ।
ब्रह्मिष्ठो ब्रह्म सूत्रार्थो ब्रह्मज्ञो ब्रह्म चेतनः ॥ १०३ ॥

गायको गरुडारूढो गजासुर विमर्दनः ।
गर्वितो गगनावासो ग्रन्थि त्रय भेदनः ॥ १०४ ॥

भूत मुक्तावली तन्तुः भूतपूर्वो भुजङ्ग भृत् ।
अतर्क्यस् सूकरः सूरः सत्तामात्रस् सदाशिवः ॥ १०५ ॥

शक्ति पातकरश् शक्तः शाश्वतस् श्रेयसां निधिः ।
अजीर्णस् सुकुमारो ऽ न्यः पारदर्शी पुरन्दरः ॥ १०६ ॥

अनावरण विज्ञानो निर्विभागो विभावसुः ।
विज्ञान मात्रो विरजाः विरामो विबुधाश्रयः ॥ १०७ ॥

विदग्ध मुग्ध वेषाढ्यो विश्वातीतो विशोकदः ।
माया नाट्य विनोदज्ञो माया नटन शिक्षकः ॥ १०८ ॥

माया नाटक कृन् मायी माया यन्त्र विमोचकः ।
वृद्धि क्षय विनिर् मुक्तो विद्योतो विश्व वञ्चकः ॥ १०९ ॥

कालात्मा कालिका नाथः काकेटिक विभूषणः ।
षडूर्मि रहितः स्तव्यः षड्गुणैश्वर्य दायकः ॥ ११० ॥

षडाधार गतः सांख्यः षडक्षर समाश्रयः ।
अनिर्देश्यो ऽ निलो गम्यो ऽ विक्रियो ऽ मोघ वैभवः ॥ १११ ॥

हेयादेय विनिर् मुक्तो हेलाकलित ताण्डवः ।
अपर्यन्तो ऽ परिच्छेद्यो ऽ गोचरो रुग् विमोचकः ॥ ११२ ॥

निरंशो निगमानन्दो निरानन्दो निदान भूः ।
आदिभूतो महाभूतः स्वेच्छा कलित विग्रहः ॥ ११३ ॥

निस्पन्दः प्रत्यग् आनन्दो विनिर्मेषो निरन्तरः ।
प्रबुद्धः परमोदारः परमानन्द सागरः ॥ ११४ ॥

संवत्सरः कलापूर्णः सुरासुर नमस्कृतः ।
निर्वाणदो निर्वृतिस्थो निर्वैरो निरुपाधिकः ॥ ११५ ॥

आभास्वरः परं तत्त्वं आदिमः पशलः पविः ।
संशान्त सर्व सङ्कल्पः संसदीशस् सदोदितः ॥ ११६ ॥

भावाऽभाव विनिर्मुक्तो भारूपो भावितो भरः ।
सर्वातीतस् सारतरः साम्बस् सारस्वत प्रदः ॥ ११७ ॥

सर्व कृत् सर्व भृत् सर्व मयस् सत्वा ऽ वलम्बकः ।
केवलः केशवः केली करः केवल नायकः ॥ ११८ ॥

इच्छा निच्छा विरहितो विहारी वीर्य वर्धनः ।
विनिघत्यो विगतभीः विपिपासो विभावनः ॥ ११९ ॥

विश्रान्ति भूर् विवसनो विहन हन्ता विशोधकः ।
वीरप्रियो वीतभयो विन्ध्य दर्प विनाशनः ॥ १२० ॥

वेताल नटन प्रीतो वेतण्डत्वक् कृताम्बरः ।
वेला तिलङ्घि करुणो विलासी विक्रमोन्नतः ॥ १२१ ॥

वैराग्य शेवधिर् विश्व भोक्ता सर्वोर्ध्व संस्थितः ।
महाकर्ता महाभोक्ता महासंविन् मयो मधुः ॥ १२२ ।

मनो वचोभिर् अग्राह्यो महाबलि कृतालयः ।
अनहङ्कृतिर् अच्छेद्यः स्वानन्दैक घनाकृतिः ॥ १२३ ॥

संवर्ता ऽ ग्न्युदरस् सर्वान्तरस्थस् सर्व दुर्ग्रहः ।
संपन्नस् समङ्क्रमस् सत्री सन्धाता सकलोर्जितः ॥ १२४ ॥

संप्रवृद्धस् सन्निकृष्टः संविमृष्टस् समग्र धृक् ।
संयमस्थस् सन्दुदरिथः संप्रविष्टस् समुत्सुकः ॥ १२५ ॥

संप्रदुष्टस् सन्निविष्टः संस्पृष्टस् संप्रमर्दनः ।
सूत्र भूतस् स्वप्रकाशः समशीलस् सदादयः ॥ १२६ ॥

सत्व संस्थस् सुषुप्तिस्थः सुतल्पस् सत्व रूपगः ।
सङ्कल्पोल्लास निर्मुक्तः सम नीराग चेतनः ॥ १२७ ॥

आदित्य वर्णस् संज्योतिः सम्यग् दर्शन तत्परः ।
महातात्पर्य निलयः प्रत्यग् ब्रह्मैक्य निश्चयः ॥ १२८ ॥

प्रपञ्चोल्लास निर्मुक्तः प्रत्यक्षः प्रतिभात्मकः ।
प्रवेगः प्रमदार्धाङ्गः प्रनर्तन परायणः ॥ १२९ ॥

योगयोनिर् यथा भूतो यक्ष गन्धर्व वन्दितः ।
जटिलश् चटुलापाङ्गो महानटन लम्पटः ॥ १३० ॥

पाटलांशुः पटुतरः पारिजातस्य मूलगः ।
पापाटवी बृहद् भानुः भानुमत् कोटि कोटिभः ॥ १३१ ॥

कोटि कन्दर्प सौभाग्य सुन्दरो मधुर स्मितः ।
लास्यामृताब्धि लहरी पूर्णेन्दुः पुण्य गोचरः ॥ १३२ ॥

रुद्राक्ष स्रङ्मया कल्पः कल्हार किरण द्युतिः ।
अमूल्य मणि संभास्वत् फणीन्द्र कर कङ्कणः ॥ १३३ ॥

विच्छक्ति लोचना ऽ नन्द कन्दलः कुन्द पाण्डुरः ।
अगम्य महिमा ऽ म्बोधिर् अनौपम्य यशो निधिः ॥ १३४ ॥

चिदानन्द नटाधीशः चित् केवल वपुर्धरः ।
चिदेका रस संपूर्णः श्रीशिवः श्रीमहेश्वरः ॥ १३५ ॥

---

**॥ इति श्रीनटेश सहस्रनाम स्तोत्रं सम्पूर्णम् ॥**